# Bharatiya-Yuddha-Virah

# भारतीय-युद्धवीराः

## Document Information

Text title : Bharatiya-Yuddha-Virah

File name : bhAratIyayuddhavIrAH.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Patriotic Sanskrit Poem

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : November 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Bharatiya-Yuddha-Virah

# भारतीय-युद्धवीराः

हे भारतीय-सङ्ग्राम-वीर-वर्गाः !
स्वीय-प्राणोत्सर्गैः समलङ्कृत-स्वर्गाः !
कृते समेषां भवतां
नानाशस्त्रचालनै-र्भारत-राष्ट्रं समवतां
भारतीया भ्रातृ-भगिनी-समुदायाः
समुच्चारित-करुण-विदायाः
प्रशंसन्ति, विलपन्ति, आलपन्ति,
गर्वमनुभवन्ति, जल्पन्ति
स्मृति-विनम्र-मस्तकाः
कृतज्ञाः स्वदेश-हित-चिन्तकाः ॥

वैरि-सन्तप्ताया मातृभूम्याः सुरक्षार्थं
परित्यक्त-वैयक्तिक-सुख-सार्थं
अन्तक-भीतिं न चिन्तयन्तः
अमृतत्वं ये प्राप्तवन्तः
जन्मदाया वसुधाया वर-सन्तानाः
शौर्य-सूर्य-रश्मि-राशिं दधानाः
भारत-मातुः सविजय-गानम्
भवन्तो नमस्याः सुचिर-वन्द्याः ससम्मानम् ॥

विष-कुम्भाः पयोमुखाः प्रतिवेशिनः
वर्वराचरणा अविश्वासिनः
अन्येषामनिष्टं चिन्तयन्तः पश्चात्पदाः
निवृत्ता भीति-त्रस्ता निरस्त-मदाः ॥

सत्कर्त्तव्याचरणार्थं कृत-शपथाः
निर्भयं समाश्रित-मृत्यु-पथाः

मातृसेवायां भवन्त आहुतीकृतासवः
त्यक्त-रक्ता देश-भक्त-प्रवराः सद्बन्धवः ॥

हे जन्मभूमि-मान-धन-बोधाः
दुष्टाराति-निपातनाः
धृतायुधा अपराजेय-योधाः
सिंह-संहति-सम्पन्नाः !
निवेद्यन्ते भवत्कृते समेषामस्माकम्
सजलाः श्रद्धाञ्जलयः सनमोवाकम् ॥

– रचयिता : डॉ हरेकृष्ण-मेहेरः

Copyright Dr.Harekrishna Meher

---

*Bharatiya-Yuddha-Virah*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*